International Journal of Sanskrit Research 2024; 10(3): 171-178

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(3): 171-178
© 2024 IJSR
www.anantaajournal.com
Received: 07-04-2024
Accepted: 12-05-2024

**Mayuri Raja Rajeswari Panda**
Research Scholar, Department of Sanskrit, Kalahandi University, Odisha, India

**Corresponding Author:**
**Mayuri Raja Rajeswari Panda**
Research Scholar, Department of Sanskrit, Kalahandi University, Odisha, India

# श्रीजगन्नाथमन्दिरस्य समीक्षात्मकम् अध्ययनम्

## Mayuri Raja Rajeswari Panda

## प्रस्तावना

नवधाभक्तिसम्बलितं जगन्नाथोपासनायाः महत्त्वं विशिनष्टि । जगन्नाथाश्रितानां भक्तानां हृदये भक्तिरसमुत्पादयति । द्वैतवादिसम्मतं भक्तितत्त्वमस्य दर्शनस्य मूलभूतं लक्ष्यम् । दारुविग्रहस्य सर्वान्तर्यामिनोऽखिललोकाधिष्ठातुरानन्दकन्दस्य सच्चिदानन्दस्य सर्वेश्वरस्य श्रीजगन्नाथस्य श्रीहरेः सत्तामधिगन्तुं यद्यपि अजस्रपन्था स्थिरीक्रियते विद्वद्भिस्तथापि अनपायिन्या भक्त्या भक्तः अचिरमेवानन्दघनं भगवन्तमुपलभ्य कृतकृत्यो जायते । तथाह श्रुतिः- “विज्ञानघनानन्दघनासच्चिदानन्दैकरसे भक्तियोगे स तिष्ठति” इति । मोक्षसाधनोपायेषु प्रसिद्धेषु योगज्ञानकर्मभक्तिषु भक्तिरेव सर्वश्रेष्ठा प्रतिपादिता । स्मृतिरपि-

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच ॥ (भ०गी-१८/६६) इत्यत्र त्वां निश्चितबुद्धिमन्तं सर्वपापेभ्यः सर्वधर्माधर्मरूपबन्धनेभ्योऽहं नूनं मोक्षयिष्यामीति अर्जुनं प्रति भगवतः समुपदेशः स्पष्टः । ईश्वरदर्शनहेतोः भक्तिरत्यावश्यकी । मन्दमतीनामत्यल्पशक्तीनामल्पायुषां च मनुष्याणां मनसः प्रसादाय चित्तप्रशान्तये परमानन्दप्राप्तये भक्तिरहितः कश्चन सुगमो मार्गो नास्ति । सुतरां सर्वसाधनसहजा समर्पणात्मिका भक्तिर्गरीयसी वरीयसी च । तथा हि भगवता वासुदेवेन- मां च यो व्यभिचारेण भक्तियोगेन सेवते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ अपि च तत्र- भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ (गी०-१४/२६,१८/५५) इति भगवदनुग्रहद्वारा एव सकलपुरुषार्थसिद्धिर्यस्मात् तस्मात् कर्मयोगो ध्यानयोगो ज्ञानयोगो वा अन्यो वा यः कश्चित् स सर्वोऽपि भक्तिद्वारेणैवार्थकरो भवेन्नान्यथा । इत्यत्र कर्मयोग-ध्यानयोगयोः रहस्यं भक्तियोगोक्तः ।

श्रीमद्भागवतं तु श्रीकृष्ण-परब्रह्मणोरभेदो मनुते । ब्रह्मसूत्रेषु प्रतिपादितं ब्रह्म, श्रीमद्भगवद्गीतायां वर्णितः पुरुषोत्तमः, श्रीमद्भागवते चित्रितः श्रीकृष्णश्चेति भिन्नाः प्रतीयमाना सन्तोऽपि त्रयो वस्तुतः एकमेव तत्त्वमास्ते । यच्चोक्तं भागवते- वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति कथ्यते ॥ (१/२/११) औपनिषदा अद्वैतवादिनो मुख्यतत्त्वं बह्मरूपेण कथयन्ति । योगविशारदास्तु परमात्मशब्देन परिचिन्वन्ति । भक्तास्तु सच्चिदानन्दस्वरूपं तत्त्वं भगवानिति गायन्ति । भक्तानां मतानुसारं वासुदेव-जगन्नाथ-नायायण-श्रीकृष्ण-गोविन्दप्रभृतीनि नामानि पर्यायवाचकानि भवन्ति, नान्यथा । यद्यपि परमार्थज्ञानेन जीव-भगवतोरभेदस्तथापि व्यवहारदृशा भेद एवेति निश्चप्रचम् । जीवः सेवको मायायुक्तो भगवान् सेव्यो मायामुक्त इत्यनयोः महान् भेदः । भक्तः कदापि मुक्तिर्नेच्छति । भक्तस्य कृते मुक्तेरपेक्षया भक्तेरेव प्राधान्यमिति वैष्णवीयसिद्धान्तः । यच्चोक्तं भागवते-

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युतः । दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥ (भा०३/२९/२३) भगवत्सेवा व्यतिरिक्तं मुक्तिमपि तुच्छमिति मन्यमानस्य भक्तस्य कृते नूनमेतादृशो भक्तियोगः परमपुरुषार्थो वरीवर्ति ।

श्रीपुरुषोत्तमजगन्नाथस्य स्वरूपं ध्यानं च प्रणवात्मकं वर्णितम् । बलभद्र-सुभद्रा-जगन्नाथानां स्वरूपं यथाक्रमं अ उ म वर्णानां समष्टिभूतं प्रणवस्वरूपम् । सुदर्शनचक्रस्य स्वरूपमेषां ज्योतिर्मयानां शक्तीनां समष्टीभूतम् । प्रथमपरार्द्धेऽयं जगन्नाथः नीलमणिविग्रह आसीत् । तदनन्तरं दिव्यदारुमयी मूर्त्तिरभूत् । अस्य पुरुषोत्तमक्षेत्रस्य श्रीजगन्नाथस्य च माहात्म्यमबलम्ब्य बहवो विद्वांसो बहुपुस्तकानि लिखितवन्तः । सर्वदर्शनादर्शः भगवान् श्रीजगन्नाथ एव परमेश्वरः । यच्चोक्तमभियुक्तैः-

"यद्ब्रह्मेति निनादितं हि परमाऽद्वैतप्रियैः शांकरैः
विष्णुर्वैष्णवशेखरैश्च भणितो माध्वैस्तथा भास्करैः ।
निम्बार्कैः खलु वल्लभैर्व्रजसुतो रामश्च रामानुजैः
सोऽयं दारुमयः सुगोपललितश्चैतन्यकान्तोऽवतु ॥"

इति द्वैताद्वैतीनां सारभूतः सिद्धान्तः दारुब्रह्म निश्चितः । द्वितीये श्लोके स एव शैवानां प्रियः शिवः । गाणपत्यानां गणपतिः । सौराणां सूर्य इति निश्चितः । पञ्चविंशतितत्त्वानि जगन्नाथविग्रहे सम्मिलितानि भवन्ति । अष्टांगयोगसारस्त्वमेव । न द्रव्यादयः सप्तपदार्था मोक्षप्रदायिकाः । नापि मोक्षे षोडशपदार्थज्ञानस्य काचिदावश्यकता विद्यते । मायावादिमतं कुहकवद् हेयम् । कलौ जगन्नाथः बुद्ध इति अच्युतदासादयो महापुरुषाः कथयन्ति । अहिंसासमर्थकस्य विष्णोः नवमावतारभूतस्य भगवतो बुद्धमतस्य समादर अत्र विहितः । जैनमतं नादृतम्। पाञ्चरात्रव्युहातीतः परमेश्वरो महाकारुणिको दारुदेवोपासना सर्वोत्कृष्टा । उक्तं चात्र-

व्यूहातीतसमस्तदृश्यपटलं तद्दारुदेहाश्रितः
सूक्ष्मस्थूलचतुष्टयैर्विलसितो वेदान्तसारोपमः ।
नित्यं तत्त्वमसि प्रधानपुरुषो मायामयो निर्जर
आस्ते मिष्टमहाप्रसादजनकः कैवल्यदाता हरिः ॥
इत्यत्र जगन्नाथस्य सर्वेश्वरत्वं सिद्धान्तितम् ।

**1. श्रीक्षेत्रधामविवेचनम्**

भारतवर्षमस्माकं पुण्यायतम् । इदं क्षेत्रं सर्वेषां महापुरुषाणां व्यासवसिष्ठादीनां मुनि-ऋषिणामुत्पत्तिस्थलम् । अत्र स्थिताः धर्मस्तम्भरूपा बहवः गिरि-पुरी-नद-नद्यश्च भारतस्य ख्यातिं द्विगुणीकुर्वन्ति । स्वयं भगवान् अस्मिन् भारतवर्षे नानावतारान् विधृत्य दुष्टनिग्रहाय शिष्टानां च परिपालनार्थं आविर्बभूव । यच्चोक्तं श्रिमद्भागवते-
अहो अमीषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः । इति भरतेन पालितत्वात् भारतं प्रसिद्धम्। उत्कलं भारतस्य महान् राज्यविशेषम् । उत्कृष्टा कला यस्य वा उत्कलम् । चतुःषष्ठिकलानिपुणाः इमे उत्कलीयाः । त्रिंशन्मण्डलमण्डितं मन्दिरमालाभिः सुसज्जितमिदमुत्कलराज्यं परमपावनमयम् । तथा च स्मृतिः- उत्कलो नाम देशोऽस्ति ख्यातः परमपावनः । तत्र तीर्थान्यनेकानि पुण्यान्यायतानि

च ॥ दक्षिणस्योदधेस्तीरे स तु देशः प्रतिष्ठितः । यत्र स्थित्वा वै पुरुषाः सदाचारनिदर्शनाः ॥ अपि च कपिलसंहितायां –वर्षाणां भारतः श्रेष्ठः देशानामुत्कलः श्रुतः । उत्कलस्य समो देशो नास्ति नास्ति महीतले ॥ इत्यत्र मोक्षप्रदायिकायां उत्कलक्षेत्रे सागरतीरे पुर्यां श्रीक्षेत्रं शंखक्षेत्रं वेति महत्क्षेत्रं विद्यते यत्र नीलाचले शंखनाभौ श्रीमन्दिरं शोभते । अत्र नीलाचलस्य गुहायां देवाधिदेवस्य लीलापुरुषोत्तमस्य दारुब्रह्मणो नित्यनिवासस्थानं परमानन्दसन्दोहात्मकम् । यच्चोक्तं - नीलशैलगुहान्तःस्थं दारुरुपिणमव्ययम्। ये पश्यन्ति नरा मां ते जीवन्मुक्तो न संशयः ॥ उत्कलीया महापुरुषा अपि अस्मिन् विषये न मौनाः । ते मुक्तकंठेन गायन्ति- ए नीलगिरि नित्य सम । तेणु श्रीकृष्ण नित्य धाम । ए नीलगिरि नित्य दुइ । अभिन्न अभेद अटै । गोप मथुरा द्वारावती । श्रीकृष्ण अयोध्यार पति । इति । मर्त्यवैकुण्ठतुल्यमतीव गोपनीयं श्रीक्षेत्रम् । एतत्सर्वं जगन्नाथदर्शने-

दिव्यत्कोटिशरत्कलाकररुचं शंखाकृतिस्तैंजसं
नीलाद्रिप्रणवाद्यतत्त्वगहनं प्राचीरबिभ्रत्त्रयम् ।
चातुष्कोणितनादविन्दुरहितं दीप्तं चतुर्द्वारकं
त्रैमात्रं हरिधामशाश्वतसुखं वैकुण्ठनोमोज्ज्वलम् ॥
इति ।

## 2. श्रीमन्दिरम्

19-48-17 अक्षांशे 85-41-06 द्राघिमारेखायां भौगोलिकस्थित्यां पुरीधामस्थं श्रीजगन्नाथमन्दिरमुत्कलीयानां ख्यातिं विकाशयति । श्रीमन्दिरस्य शिल्पचातुर्यं तु विश्ववासीनां मनांसि चमत्करोति । श्रीवत्सखण्डशाल नामकं श्रीमन्दिरं कदाचिद्राजराजेश्वरमिति निगद्यते। 214f 8 inch उच्चताविशिष्टमिदं खी०पू० ११६१द्वादशशताब्द्यां अनन्तवर्मचोडगंगदेवेन निर्मितम् । मुख्यमन्दिरं गर्भगेहं वा विमानसंज्ञकम्। द्वितीयं मुखशालाख्यं श्रीजगमोहनम् । तृतीयो नाटमण्डपः । चतुर्थो भोगमण्डपश्च ।

## 3. चतुर्धामूर्तयः

दारुविग्रहाणां निर्माणं भगवता विष्णुना संपादितम् । उक्तं च- निर्ववाह स्वयं देवः क्रमात्पञ्चदशे दिने । चतुर्मूर्त्तिः स भगवान् यथापूर्वं मयोदितः॥ इति लक्षशालग्रामशिलाभिः पूर्णे नानामणिमये कोटिसूर्यसमप्रभे दिव्यसिंहासने प्रणवात्मिके मुख्यरूपेण चतुर्धामूर्तयः शोभन्ते । वस्तुतः श्रीजगन्नाथ बलभद्रः सुभद्रा सुदर्शनः भुदेवी श्रीदेवी माधवश्च एवं सर्वे मिलित्वा सप्तधा मूर्तय भवन्ति ।

## 4. चतुर्द्वाराणि:

सिंह-व्याघ्र-हस्त्यश्वभेदेन चतुर्द्वाराणि पूर्वपश्चिमोत्तरदक्षिणभागेषु विद्यन्ते।

## 5. प्राचीरम्:

ख्री०पू०१४५२ तमे शतके गजपतिना कपिलेन्द्रदेवेन श्रीमन्दिरस्य चतुःपार्श्वे "मेघनाद" नामकं प्राचीरं विनिर्मितम् ।

## 6. अरुणस्तम्भः

अष्टादशशताब्द्यां दिव्यसिंहदेवद्वितीयेन कोणार्कादानीतः 33f 08 inch विशिष्टोऽयं स्तम्भः सिंहद्वारसम्मुखे विराजते ।

**7.गरुडस्तम्भः-** मुख्यमन्दिरसम्मुखे विराजते 10f विशिष्टोऽयं गरुडस्तम्भः ।

## 8. नीलचक्रम्

अष्टधातुनिर्मितं चक्राकारमष्टारविशिष्टं पताकाधारभूतं नीलचक्रम् श्रीमन्दिरशिखरे राजते । अस्य उच्चता 11f 08 inch व्यासः 7ft 06 inch परिधिफलकस्य वेधः 2 inch परिधेः प्रस्थः 09 inch वर्तते । अस्य केन्द्रस्थलस्थितस्य वृताकारक्षेत्रस्य व्यासः 2ft 2.5 inch अरस्य दैर्घ्यः1ft 10 inch अस्ति ।

## 9.द्वाविंशसोपानानि

पञ्चज्ञानेन्द्रियाणि, पञ्चप्राणाः, पञ्चतन्मात्राणि, पञ्चमहाभूतानि, ज्ञानम् अहंकारश्च सर्वेमिलित्वा द्वाविंशतिसंख्यकानीति सोपानानि भानुदेवेन विनिर्मितानि । अपरे तीव्रा-कुमुदवती-मन्दा-छन्दोवती-दयावती-रंजनी-रतिका-रौद्रा-क्रोधा-वद्रिका-प्रसारिणी-व्रती-मार्जनी-ख्याति-रक्ता-सान्दिपनी-

आजापनी-मन्दन्ती-रोहिणी-रम्या-उग्रा-क्षोभिण्यः द्वाविशतिसंख्यकाः योगिन्यः सोपानाधिष्ठात्रिण्यः इति तान्त्रिका मन्यन्ते ।

**10. पार्श्वदेवताः**

मुख्यमन्दिरस्य उत्तरे वामनः, दक्षिणे वराहः, पश्चिमे नृसिंहो विद्यन्ते । अष्टौ दिग्पालाः नवग्रहाः दशावताराः एवं अन्ये बहवो देवा देव्यश्च विद्यन्ते । वेढायां तु सिंहद्वारसम्मुखस्थानस्य दक्षिणे पार्श्वेपतितपावननामा पूर्वाभिमुखः जगन्नाथविग्रहो वर्त्तते । अस्पृश्यजातीनां मन्दिरप्रवेशनिषिद्धानां दर्शनाभिलाषिणां भक्तानां कृते असौ प्रेममयो दर्शनीयोऽस्ति । गुमुटस्य वामे फतेमहावीर-राधाकृष्ण-गणेश-दुर्गादीनां विग्रहाः शोभन्ते । पावच्छवामे १५ फुट् उच्चताविशिष्टं काशीविश्वनाथस्य मन्दिरमस्ति । पार्श्वे सीतारामाभ्यां सह चत्वारो भ्रातरः हनुमान् सुग्रीव जाम्बवान् एवं सर्वे वानरभक्ता प्रभुप्रणिपादपुरःसरं दृश्यन्ते। नृसिंहनाथस्य तथा गणनाथस्य शिलाविग्रहौ विद्येते । कूर्मवेढायां वामे अग्निश्वरो महादेवः पाकवस्तूनां शोधकत्वेन परिचितोऽस्ति । भोगमण्डपस्य ऊद्ध्र्वकुड्ये अनन्तनारायण-लक्ष्मी-सरस्वती-प्रजापति-विष्णादिवेवानां चित्राणि शोभन्ते । तद्दक्षिणेन सत्यनारायणस्य पाषामप्रतिमा पञ्चरथमन्दिरे अस्ति । प्रतिमायाः वामदक्षिणयोः श्रीदेवी भूदेवी च विद्येते । अन्यानि यथा-बालमुकुन्द-वटगणेश-हरिसहदेव-वटावकाश-वाटमंगला-संकटतारिणी-महावज्रेश्वरी-लोकनाथ-यमेश्वर- नीलकंठेश्वर-महामृत्युञ्जय-मार्कण्डेय-कपालमोचन-सूर्यनारायण-कुत्तामचण्डी-अनन्तवासुदेव-क्षेत्रपाल-यज्ञनृसिंह-रोहिणीकुण्ड-नाटगणेश-विमला-गोपेश्वर-वेणुमाधव-साक्षिगोपाल-काञ्चीगणेश-क्षीरचोरागोपीनाथ-महालक्ष्मी-भुवनेश्वरी-श्रीसरस्वती-षष्ठीदेवी-सावित्री-गायत्री-मनसा-नीलमाधव-वेढाकाली-लक्ष्मीनारायण-वद्रीनारायण-द्वारकानाथ-सूर्यचन्द्रौ-दधिवामन-गोपीनाथ-रामचन्द्र-वलिपाताल-पादपद्म-शुकसारी-ऐशानेश्वराणि पार्श्वाणि मन्दिराणि अतीव रमणीयानि सन्ति ।

**11. षोडशमण्डपाः**

श्रीमन्दिरपरिसरे भेटमण्डप- चाहाणिमण्डप-स्नानमण्डप-वैकुण्ठमण्डप-वकुलमण्डप-भोगमण्डप-मुक्तमण्डप-माजणामण्डप-जलक्रीडामण्डप-नाभिकटामण्डप-देवसभामण्डप-अचिन्तामण्डप-नाटमण्डप-आडपमण्डप-रत्नमण्डप-यज्ञमण्डपाश्च षोडशमण्डपाः विराजन्ते । सर्वादौ रत्नमण्डपविषये विचार्यते । रत्नमण्डपो वा रत्नवेदी सप्तधामूर्तीनां कृते आसनम् । तत्रादौ बलभद्रस्य मध्ये सुभद्रायाः ततः जगन्नाथस्य त्रीणि चक्राणि विद्यन्ते । जगन्नाथस्य वामे श्रीदेवी सुदर्शनः माधमाः दक्षे च भूदेवी विराजन्ते । वेदिकाया उच्चता ४ फुट वर्तते। षोडशमण्डपेषु अन्यतमः मुक्तिमण्डपः । मुक्तमण्डप इति वा नामान्तरः । पुरीस्थितषोडशशासनब्राह्मणानां कृते अत्र स्थानं विद्यते । तत्र विराजमानाः सन्तः ते सर्वे पण्डिताः धर्मशास्त्रविहितानां नीतिनियमानां समुपदेशं प्रदापयन्ति। शास्त्रसन्देहान् उन्मोचयन्ति । श्रूयते श्रीमन्दिरप्रतिष्ठासमये इदं स्थानं ब्रह्मणः आसनं आसीत् । अत्रासनं पातयित्वा चतुर्मुखो ब्रह्मा श्रीमन्दिरप्रतिष्ठां चकार । यज्ञभस्मोपरि अयं मण्डपो विनिर्मितः । गोवर्द्धनमठाधीशः श्रीशंकराचार्य्यः अस्य स्थायी सभापतिः । तदतिरिक्तानां राजगुरु-रायगुरु-मन्दिरपुरोहित-सन्न्यासि-नैष्ठिकवयोज्येष्ठपण्डितब्राह्मणानामपि अत्राधिकारो श्रूयते ।

**12.आनन्दवजारः**

भक्ष्यभोज्यचव्यचोष्यलेह्यपेयाः सर्वे श्रीजगन्नाथप्रसादाः यत्र विक्रियन्ते स आनन्दवजारः । अत्र भक्ता सानन्देन महाप्रसादं भुञ्जन्ति ।

**13.पञ्चतीर्थानि-**

मार्कण्डेय-श्वेतगंगा-समुद्र-स्वर्गद्वार-चक्रतीर्थ-इन्द्रद्युम्नानि पञ्चतीर्थानि सन्ति । महाभारते महोदधि-रोहिणीकुण्ड-श्वेतगंगा-इन्द्रद्युम्न-मार्कण्डेयानि प्रसिद्ध तीर्थानि ख्यातानि ।

**14.नीतिकान्तिविवेकः**

श्रीमन्दिरपाकशालायां २५० ततोऽधिका वा चुल्यः सन्ति । तत्र प्रत्यहं विग्रहाणां कृते अन्नादिकं पच्यन्ते । ५६ संख्यकाः भोगाः प्रसिद्धाः । प्रतिदिनं प्रातःधूपः,मध्याह्नधूपः,सन्ध्याधूपश्च त्रयो धूपाः पञ्चावकाशाः द्विपहुडौ च भवन्ति । अत्र सुआराः पाचकाः । चतुर्द्धामूर्तिभ्यो नैवेद्यात्परं तन्नैवेद्यं पुनः विमलादेवै समर्पणं भवति । पश्चात्तनैवेद्यं महाप्रसाद अबढा नाम्ना व्यवह्रियते । तत्तु संसारमलनाशकं स्पृष्टास्पृष्टविवर्जितं माहार्द्दमिति । उक्तं च- जगन्नाथस्य नैवेद्यं महापातकनाशनम् । भक्षणात्फलमाप्नोति कपिलाकोटिदानकम् ॥ चण्डालादि जनस्पृष्टं तदन्तं च नृपोत्तम । भोक्तव्यं सहसा विप्रैः पावनं सुरदुर्लभम्॥ इति । श्रीजगन्नाथस्य चतुर्विंशति वेशेषु द्वाविंशतिवेशाः सर्वदा पालनीया भवन्ति । सुवर्णवेशः वर्षस्य पञ्चकृत्वो भवति । स्वर्णरौप्यरत्नादीनि बहुविधानि आभरणानि श्रीविग्रहाणां कृते भिन्नानि भवन्ति । रथयात्रायां रथे कदाचित् मन्दिरे तानि धारणीयानि भवन्ति । टाहिआ पुष्पमुकुटम् । श्रीमन्दिरे ३६ संख्यकाः नियोगाः सेवका विद्यन्ते । आद्यो गजपतिः । द्वितीयो मुदिरथः । अन्ये पूजापण्डादयः बहुविधाः विद्यन्ते । पर्वाणि चात्र बहुविधानि । द्वादशविधा यात्रासु विश्वप्रख्याता "श्रीगुण्डिचा" घोषयात्रा नवदिनात्मिका । अत्र रथमारुह्य पतितोद्धारणार्थं श्रीजगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनादयः चतुर्द्धाविग्रहाः रथमारुह्यमानाः श्रीमन्दिरात् गुण्डिचामन्दिरं यावत् गच्छन्ति । त्रयो रथाः नन्दिघोष-तालध्वज-दर्पदलनभेदेन । नन्दिघोषः श्रीजगन्नाथस्य । तालध्वजो बलदेवस्य । दर्पदलनः सुभद्रायाश्च रथः । अत्र पुर्य्यां जगन्नाथोपासना सर्वोत्कृष्टा ।

**15. रथयात्रा रथविश्लेषणं च**

आषाढशुक्लद्वितीयायां श्रीक्षेत्रे रथयात्रा नवदिनात्मिका विश्वप्रसिद्धा। सा भक्तकल्याणकारिणी "श्रीगुण्डिचा"नामा। भुक्तिमुक्तिप्रदायिनी । रथे जगन्नाथो वामनः । कदाचित् राजराजेश्वरः । गुण्डिचायात्रायाः महानायकः । यदुक्तम्- जगन्नाथादयश्चत्वारो मूर्तयः गोटिपहण्डि माध्यमेन टाहिआ विभूषिताः सन्तः रथान् प्रति आगच्छन्ति । भक्तैरज्जुराकृष्यमाणाः बडदाण्ड मार्गे गुण्डिचामन्दिरं यावत् रथारूढो व्रजन्ति । तत्र आडपमण्डपे नवदिनानि उषित्वा जन्मभूमिलीलां समाप्य दशम्यां पुनः दक्षिणाभिमुखेन श्रीमन्दिरं प्रत्यावर्त्तयन्ति । इयं सुमधुरा "बाहुडायात्रा" इति कथ्यते । एकादश्यां तिथौ श्रीमन्दिरसम्मुखे रथे जगन्नाथ- बलभद्र- सुभद्राः सर्वे सुर्वर्णवेशैः समुज्ज्वलिता भवन्ति । अयं बडतढउ वेशः हिरण्मयवेशो वा चतुर्वर्गफलप्रदः । जन्मजन्मान्तरकष्टविदारक अतीव रमणीय इति । बहु पुरातनी रथसंस्कृतिः । अस्माकं भारतवर्षे वैदिककालादारभ्य रथनिर्माणस्य परंपरा वर्तते । पुर्य्यां त्रिषु रथेषु २१८८ काष्ठखण्डानि व्यवह्रियन्ते । तेषु फाशी-धउरा-असन-शाल्मली-देवदारु-पालधुआ-कअंस-महानिम्ब-वृक्षाणां प्रमुखभूमिका वर्तते। इमे वृक्षाः नयागड-दशपल्ला वनविभागेन प्रदीयन्ते । वैशाख-शुक्ल-तृतीया अथवा अक्षयतृतीया-दिवसात् प्रतिवर्षं नवीन-रथनिर्माणस्य शुभारम्भो जायते । शिल्पशास्त्र-मानसार-अपराजितपृच्छा-शुल्वसूत्र-मयमत-विशकर्मप्रकाश- शिल्पसारसंग्रहादिषु ग्रन्थेषु रथनिर्माणस्य वर्णनं लभ्यते। शिल्पशास्त्रानुसारं नन्दिघोषादिरथानां निर्माणं भवति । देवी चर्च्चिका रथनिर्माणस्य इष्टदेवी । श्रीनहर (राजगृहस्य) सम्मुखे इयं देवी विराजमाना । तत्र रथखलां (रथनिर्माणस्थानम्) निर्माय रथनिर्माणकार्यं जायते । रथनिर्माणे ये जनाः नियुक्ता भवन्ति तेषु विश्वकर्म(वर्धकी)-कर्मकार-रूपकार-चित्रकार-सूचीकार-भोइसेवकाः प्रमुखाः । ते निर्मातारः पारंपरिक-हस्त-अगुलि-मानेन रथनिर्माणं कुर्वन्ति ।

**15(a) नन्दिघोषः**

नन्दिघोषः श्रीजगन्नाथस्य स्यन्दनम् । अस्य नन्दिघोषस्य गरुडध्वज-चक्रध्वज- कपिध्वजभेदेन नामानि प्रसिद्धानि। अयं रथः इन्द्रप्रदत्तः । रथरत्नं

स्पटिकम् । विश्वकर्मा अस्य निर्माता । ३३ हस्त ५अंगुल =४४फुट ३ इन्च उच्च-परिमिते अस्मिन् रथे ८३२ संख्यकानि काष्ठानि व्यवह्रियन्ते । अस्य षोडशसिद्धि-परिमितानि १६ चक्राणि,१६ अराश्च भवन्ति । प्रतिचक्रस्य व्यासः ७ फिट् । दैर्घ्य-प्रस्थौ ३५ फुट् । रथपीठस्य क्षेत्रफलः १२२५ फुट् । भूमेः दधिनउति-उच्चता २४ फुट् । पीतलोहितो रथावरणः। हिरण्यगर्भः दधिनउतिः । तत्र जीव-परमौ शुकपक्षियुगलौ । दारुकः रथ-सारथिः । चत्वारो घोटकाः शंख-श्वेत-बलाहक-हरिदश्वाः शुभ्राः । रथरज्जुः शंखचूडः। नभ-व्योम-आकाशानि त्रयः कलशाः । कलशोपरि शून्यचक्रस्य नाम सुदर्शनम् । पताका त्रैलोक्य मोहिनी । ध्वजचिह्नं हनुमान् । शंख-चक्रे रथायुधे । षोडशदलाकृतिः भद्रपीठः । चन्द्रातपनाम कनकमुण्डी । सम्मुखद्वारस्य चित्रं कल्पवृक्षस्य द्वे पत्रे । उत्सवमूर्ती वासुदेव-मदनमोहनौ। जय-विजयौ द्वारपालौ । कुमुद-कुमुदाक्षौ प्रतिहारौ। रथरक्षकौ इन्द्र-गरुडौ । भैरव-नरसिंह-गरुड-वासुदेवाः रथपालाः । रथाधिपो वैनतेयः । रथदेवता नृसिंहः । शीर्षदेवता कल्याणसुन्दरः । चरदेवौ वराह-नृसिंहौ । सम्मुख पार्श्वदेवताः ब्रह्मेन्द्र-सप्तर्षयः । पृष्ठभागदेवताः नृसिंह-राम-नारायणाः । वामभागदेवताः त्रिविक्रम-हनुमत्-रुद्राः । दक्षिणे वराह-कृष्ण-गोपीनाथाः । रथदेवी योगमाया । रथभैरव एकपात् । रथशक्ती विमला –विरजे । रथयक्षः हर्यक्षः । रथगन्धर्वः वैधृतिः । रथ-सम्मुखे फुलमोची उर्वशी, पृष्ठे कनकमञ्जरी काममञ्जरी, वामे प्रेममञ्जरी चम्पकमञ्जरी, दक्षिणे अनंगमञ्जरी भ्रमरमञ्जरी चेमाः सर्वाः रथासीना अप्सरसस्तथा नारद-देवल-व्यास-शुक-पराशर-वशिष्ठ-विश्वामित्र-रुद्राः ऋषयश्च नन्दिघोषे विलसन्ति । अस्मिन् नन्दिघोषे देवाधिदेवस्य अपूर्वमहिमा उक्ता –

लक्ष्मीं संवरयन्दरं विदलयनंस्तापं महाखण्डयन्
भक्तानाकलयन्सुखं च रसयन्संपालयन्सत्वरम् ।
यात्रां संवरयन् पहण्डिविलसन्प्रास्वादयन्गुण्डिचां
संपश्यन्जगदीश्वरो विजयते श्रीनन्दिघोषोपरि ॥
इति ।

**15 (b)-तालध्वजः**

तालध्वजरथस्य नायकः देवाधिदेवो बलदेवः । अस्य लांगलध्वज इति नामान्तरमस्ति । रथरत्नं मर्कतम् । मयदानवः अस्य निर्माता । ३२ हस्त १०अंगुल अथवा ३९ फुट् ४ इन्च उच्चमान-विशिष्टेऽस्मिन् रथे ७६३ काष्ठखण्डानि व्यवह्रियन्ते । चतुर्दशभुवनसंज्ञकानि अस्य १४ चक्राणि,१४ अराश्च सन्ति । चक्रव्यासः ६ फुट् । रथपीठो मेरुकैलाश-संज्ञकः ३४ फुट् दैर्घ्य-प्रस्थविशिष्टः अष्टदलपद्माकारश्च । क्षेत्रफलः ११५६ फुट् । रथावरणः नीललोहितः । दधिनउतेर्नाम भुवनकोषः । अस्मिन् सुपर्ण-द्वासुपर्णौ शुकपक्षियुगलौ । चन्द्र-सूर्य-विद्युतः कलशत्रयः । कलशोपरि शून्यचक्रं कालसंहारः । पताका ऊन्मनी । ध्वजे तालचिह्नम्। रथरक्षकाः वासुदेव-भास्कर-रुद्राः । हल-मुसलौ रथायुधे । तीव्र-घोर-दीर्घश्रम-स्वर्णनाभाः चत्वारो घोटकाः कृष्णवर्णाः । रथरज्जुर्वासुकिः । ब्रह्म-शिवौ रथशक्ती । चन्द्रातपः कनकमेखलः । सम्मुखद्वारचित्रं पञ्चपत्रविशिष्टं तालपत्रम् । राम-कृष्ण-गोपालाः उत्सवमूर्तयः । सुशील-अतिशीलौ प्रतिहारौ । रथपालः आदिशेषः । रथाधिपः बृहन्न्यासः । शीर्षदेवता अनन्तनागः । चरदेवौ ब्रह्म-शिवौ । गणेश-कार्त्तिकेय-मृत्युञ्जय-सर्वमंगला-प्रलम्बारि-हलायुध-नाटाम्बर-मुक्तेश्वर-शेषदेवाः नवपार्श्वदेवताः । रथदेवी केतुभद्रा । भैरवः क्षेत्रपालः । रथशक्ती जयदुर्गा शूलिनी दुर्गा च । रथयक्षः प्रचण्डः । जया- विजया-चण्डी-चण्डरूपा- नन्दा-आनन्दा-सनन्दा-तिलोत्तमाः अष्टौ अप्सरसः । अंगिरा-पुलह-पुलस्त-कृष्ण-मुद्गल-आत्रेय-काश्यप-आसष्टयः अष्टौ ऋषयः तालध्वजे निवसन्ति । तालध्वजे बडठक्कुरो बलदेवः पूर्णचन्द्रनिभो श्वेतः । महायोगिविशेष अनन्तनारायणः ।

**15(c)-देवदलनः** देवदलनस्य नायिका देवी सुभद्रा । अस्य रथस्य दर्पदलन इति नामान्तरमस्ति । रथरत्नं

माणिक्यम् । कालनेमी अस्य निर्माता । ३१ हस्त वा३७ फुट् ६ इञ्च अस्य उच्चता । ५९३ काष्ठखण्डानि अस्मिन् रथे व्यवहृतानि । अस्य राशिस्वरूपाणि १२ चक्राणि, १२ अराश्च सन्ति । चक्रव्यासः ५ फुट् । रथपीठः काम्पिल्यः ३३ फुट् दैर्घ्य-प्रस्थविशिष्टः सहस्रदलपद्माकारः । क्षेत्रफलः १०८९ फुट् । रथावरणः कृष्णलोहितः । हिरण्मयी दधिनउतिः । अत्र श्रुति-स्मृती शुकपक्षियुगलौ । परा-अपरा-वैखर्यः त्रयःकलशाः । दीप्तनामा शून्यचक्रम् । नादाम्बिका वैजयन्ती। शुभ्रपद्मं ध्वजसंकेतः । रथायुधौ पद्म-कल्हारौ । वीरघण्टः चन्द्रातपः । सम्मुखद्वारे पञ्चलताकार-चित्रम्। रथाधिश्वरौ सुभद्रा-सुदर्शनौ । उत्सवमूर्तिः जयदुर्गा । गंगा-यमुने द्वारपाले । सारथिः अर्जुनः । रोचिका-मोचिका-जिता-अपराजिताः चतस्र अश्वाः रक्तवर्णाः । स्वर्णचूडः रथरज्जुः । विमला-दुर्गा-वाराही-चामुण्डा-भुवनेश्वरी-हरचण्डी-जयदुर्गा-सर्वमंगला-उग्रताराः नव-पार्श्वदेव्यः रथस्य । भृगु-सुप्रभ-वज्र-शृंगि-ध्रुवाः रथ-ऋषयः । मनोरमा-तिलोत्तमे प्रतिहारे । रथरक्षके उग्रचण्डा-चन्द्रघण्टे । रथपालो हरिहरः । रथाधिपा वनदुर्गा । रथदेवता महामंगला । रथदेवी चन्द्रघण्टा । भैरवो घण्टाकर्णः । यक्षः किंज्वल्किकः। गन्धर्वः हा हा । एताः देवताः देवदलने विराजन्ते । अस्मिन् रथे भद्रदात्री देवी सुभद्रा सृष्टिस्थित्यन्तकारिणी । त्रिगुणरज्जुविखण्डिनी । जननी भगिनी जाया कन्यारूपविधारिणी सा ।सुदर्शनचक्रं महापातकं विनाशयति । नवग्रहपीडां लाघवयति । शत्रुसंहारं विधास्यति । अस्य महिमा पुराणादिषु इतस्ततं वर्ण्यते । प्रतप्तसुवर्णवर्णसदृशं प्रकाशशीलमिदं अज्ञानान्धकारं समूलं विनाशयति ।

**16.श्रीमहाप्रसादः**

भोगक्षेत्रेऽस्मिन् पुर्य्यां जगन्नाथः ५६ संख्यकानि नैवेद्यानि भुंक्ते । तेषु श्रीजगन्नाथस्य प्रसादो यदा विमलादेव्यै समर्प्यते तदा स महाप्रसादो भवति। सर्वरसाप्लुतमिदं सद्यं नैवेद्यं कदाचित् "अबढा" इति परिभाषितम् । न बढा=परिवेषणं क्रियते या सा अबढा । शुष्कान्नं निर्माल्यमिति गीयते ।

**उपसंहारः**

जगन्नाथदर्शने श्रीजगन्नाथोपासनायाः महत्त्वं वर्णितम् । पुरुषोत्तमो दारुब्रह्म एव परंब्रह्म नीलमाधवविलक्षणः इति विषयोऽत्र प्रतिफलितः । असौ मूलनारायणः । निःश्रेयशब्दसार्थकत्वं परमार्थतत्त्वं च वासुदेवाख्यं जगन्नाथशब्दगोचरीभूतम् । तत्तु साध्यतत्त्वमिति प्रवाच्य भक्तिसाधनेन तस्य साक्षात्कारः सम्भव इति परमपुरुषार्थोऽत्र निगदितः । मुक्तिर्भगवद्वशीकाररूपा । भक्तद्वारा भगवतो वशीकरणमेव मुक्तिरिति भक्ता मन्यन्ते । सा तु वस्तुतः मुक्तेरपि बलीयसी । पञ्चसख- बन्धुमहान्ति- सालवेग- दासिआ वाउरि- बलरामदासादयः अत्र केचन भक्ता उदाहरणरूपेण प्रस्तूयन्ते ।

**सन्दर्भ**


1. अष्टाधायी- महर्षिपाणिनिः
2. बृहदारण्यकोपनिषत्
3. न्यायसूत्रम्- गौतममुनिकृतम्
4. वैशेषिकसूत्रम्- कणादमुनिकृतम्
5. सांख्यसूत्रम्- कपिलमुनिकृतम्
6. सांख्यकारिका- ईश्वरकृष्णकृता
7. गौडपादभाष्यम्- गौडपादाचार्यः
8. योगसूत्रम्- पतञ्जलिप्रणीतम्
9. ईशावास्योपनिषत्
10. मीमांसासूत्रम्- जैमिनीप्रणीतम्
11. वेदान्तसारः- सदानन्दयोगीन्द्रः
12. ब्रह्मसूत्रम्- व्यासदेवकृतम्
13. तैत्तरीयोपनिषत्
14. छान्दोग्योपनिषत्
15. शिवसूत्रम्- वसुगुप्तप्रणीतम्
16. शैवपरिभाषा- ज्ञानशिवाचार्यः
17. सर्वदर्शनसंग्रहः- सायणमाधवाचार्यः
18. देव्यथर्वशीर्षम्
19. सामान्यदर्शनम्- प्रो॰ नीलकंठपतिः

20. दर्शनेषु तत्त्वचतुष्टयम्- प्रो० नीलकंठपतिः
21. धर्मपदः- राहुल साकृत्यायनः
22. दर्शनशास्त्रस्येतिहासः- डाँ शशिबाला गौडः
23. तत्त्वार्थसूत्रम्- उमास्वातिप्रणीतम्
24. निर्णयसिन्धुः- कमलाकर भट्टः
25. अहिर्बुध्न्यसंहिता
26. श्रीमद्भागवतम्- गीताप्रेस
27. भक्तिचन्द्रिका- विश्वनाथ पाण्डेयः
28. महाभारतम्- व्यासदेवकृतम्
29. सर्वदर्शनकौमुदी - दामोदरमहापात्र १९७५
30. दशश्लोकी- शंकराचार्यः
31. वैष्णव संप्रदायों का साहित्य और सिद्धान्त- बलदेव उपाध्यायः
32. भागवतसन्दर्भः- जीवगोस्वामी
33. श्रीमद्भगवद्गीता व्यासदेवः
34. श्रीजगन्नाथदर्शनम् डः प्रदीप्त नन्दः
35. श्रीक्षेत्रसुधानिधिः-डः प्रदीप्त नन्दः
36. भक्तिनिर्झरिणी-डः प्रदीप्त नन्दः
37. स्कन्दपुराणम्- व्यासदेवः
38. कपिलसंहिता- रत्नाकर गर्गबटुप्रकाशिता
39. महापुरुषविद्या-श्रीजगन्नाथ संस्कृतविश्वविद्यालयः
40. उत्कलप्रसंगः-२०१७ जुलाइ
41. धरित्री २०१५
42. नीलाद्रिमहोदयः- ब्रजकिशोर स्वाइँ २०१५
43. भागवतमाहात्म्यम् –व्यासदेवः
44. ऋग्वेदसंहिता- चौखम्बा प्रकाशन
45. यजुर्वेदसंहिता- चौखम्बा प्रकाशन
46. तर्कभाषा- केशवमिश्रः
47. नारदपञ्चरात्रम् – खेमराज प्रकाशन मुंम्बइ
48. भक्तिरत्नावली- कृष्णमणि त्रिपाठी
49. भक्तिदर्शनम्- शाण्डिल्यमुनिकृतम्